श्री गौरी परमेश्वरि पूजा विधानं :
सूचन:- स्त्रीलु "ओं" कारमुतो गानी, "स्वाहा" कारमुतो गानी कूडिन पूजा मंत्रालनु चदवरादु.
स्त्रीलकु अर्हत लेनि श्री सूक्तमु, पुरुष सूक्तमु, मंत्र पुष्पमु, गायत्री मंत्रमु पठनमु चेय्यरादु.
स्त्रीलु पूज, पारायण, देवालय दर्शनमुल यंदु वारि वारि सांप्रदायानिकि अनुगुणंगा चीर कट्टुकोवलॆनु.
स्त्रीलु तप्पक नुदुटुन कुंकुम बॊट्टु, काळ्लकु पसुपु, चेतिकि गाजुलु, मट्टॆलु, नल्ल पूसलु वंटि सौभाग्य द्रव्यमुलु धरिंचवलॆनु.
जुट्टु तप्पक मुडि वेसुकोवलॆनु. तललो पुव्वुलु पॆट्टुकोवलॆनु.
पूजलो साध्यमैन मेरकु अक्षतलकु बदुलु पुव्वुलने ऎक्कुवगा विनियोगिंचवलॆनु.
देवुनि उपचारामुलकु विनियोगिंचुटकु मरियु पूज चेयुवारिकि आचमनमुनकु वेरु वेरु पात्रललो जलमुनु उपयोगिंचवलॆनु.
अम्मवारिकि आचमनमुनकु समर्पिंचिन नीटिनि ऒक वेरु पात्रलोकि समकूर्चि पूजानंतरं आ जलमुनु तीर्थमुगा स्वीकरिंचवलॆनु.
पै पद्धतुलु पाटिंचि जगदoब दिव्यानुग्रहमुनु पॊंदगलरु||
श्री महा गणाधिपतये नमः
श्री गुरुभ्यो नमः
श्री सरस्वत्यै नमः
शरीर शुद्दि:
अपवित्रः पवित्रो वा सर्वावस्थां गतोपिवा | यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतर श्शुचिः ||
पुंडरीकाक्ष ! पुंडरीकाक्ष ! पुंडरीकाक्षाय नमः ||
( आचमन पात्र लोनि नीटिनि उद्दरिणितो तीसुकुनि चेतितो शिरस्सु मीद चल्लुकोवलॆनु)
( नमस्कारं चेस्तू क्रिंदि श्लोकमुलु चदुववलॆनु)
श्लो|| शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये
अगजानन पद्मार्कं गजानन महर्निशं अनेकदंतं भक्तानां एकदंतमुपास्महे||
श्लो|| गुरु ब्रह्म गुरु विष्णुः गुरु देवो महेश्वरः गुरु साक्षात् परब्रह्म तस्मै श्री गुरवे नमः||
श्लो॥ सरस्वती नमस्तुभ्यं वरदे कामरूपिणि
विद्यारंभं करिष्यामि सिद्धिर्भवतु मेसदा|
पद्मपत्र विशालाक्षी पद्म केसरवर्णिनी,
नित्यं पद्मालया देवी सा मां पातु सरस्वती||
श्लो॥ आपदामपहर्तारं दातारं सर्वसंपदां लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्||
श्लो|| यश्शिवो नामरूपाभ्यां यादेवी सर्वमंगळा तयोः संस्मरणात् पुंसां सर्वतो जयमंगळम्||
श्लो॥लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवहः येषा मिंदीवर श्यामो हृदयस्थो जनार्थनः||
श्लो|| सर्वमंगळ मांगळ्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबिके देवि नारायणि नमोस्तुते||
श्री लक्ष्मी नारायणाभ्यां नमः
श्री उमा महेश्वराभ्यां नमः

वाणी हिरण्यगर्बाभ्यां नमः
शचीपुरंदराभ्यां नमः
अरुंधती वशिष्ठाभ्यां नमः
श्री सीतारामाभ्यां नमः
नमस्सर्वेभ्यो महाजनेभ्यो नमः
अयं मुहूर्तस्सुमुहूर्तोस्तु .......
(दीपाराधन चेसे मुंदु आचमनं चेयालि)
आचमनं:
केशवाय नमः, नारायणाय नमः, माधवाय नमः,
(अनि मूडुसार्लु आचमनं चेयालि)
गोविंदाय नमः, विष्णवे नमः, मधुसूदनाय नमः, त्रिविक्रमाय नमः,वामनाय नमः, श्रीधराय नमः, हृषीकेशाय नमः, पद्मनाभाय नमः,दामोदराय नमः, संकर्षणाय नमः, वासुदेवाय नमः, प्रद्युम्नाय नमः, अनिरुद्दाय नमः,पुरुषोत्तमाय नमः, अधोक्षजाय नमः, नारसिंहाय नमः, अच्युताय नमः, जनार्धनाय नमः, उपेंद्राय नमः, हरये नमः, श्री कृष्णाय नमः
दीपाराधनं:
(उदयं दीपं पॆट्टेटप्पुडु ई श्लोकं चदवालि)
दीपस्त्वं ब्रह्मरूपोसि ज्योतिषां प्रभुरव्ययः| सौभाग्यं देहि पुत्रांश्च सर्वान्कामांश्च देहिमे||
भो दीप देवि रूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्
यावत् पूजां करिष्यामि तावत्वं सुस्थिरो भव||
दीपाराधन मुहूर्तः सुमुहूर्तोस्तु||
पूजार्थे हरिद्रा कुंकुम विलेपनं करिष्ये||
( दीपानिकि पसुपु, कुंकुम बॊट्लनु पॆट्टि, पुव्वुलनु समर्पिंचवलॆनु)
दीप देवताभ्यो नमः षोडशोपचाराणि समर्पयामि.
(सायंत्रं दीपं पॆट्टेटप्पुडु ई श्लोकं चदवालि)
दीपं ज्योति परब्रह्म, दीपं सर्वतमोपहः | दीपेन साध्यते सर्वं संध्यादीप नमोस्तुते||
दीप देवताभ्यो नमः षोडशोपचाराणि समर्पयामि
आचमनं:
केशवाय नमः, नारायणाय नमः, माधवाय नमः,
(अनि मूडुसार्लु आचमनं चेयालि)
गोविंदाय नमः, विष्णवे नमः, मधुसूदनाय नमः, त्रिविक्रमाय नमः,वामनाय नमः, श्रीधराय नमः, हृषीकेशाय नमः, पद्मनाभाय नमः,दामोदराय नमः, संकर्षणाय नमः, वासुदेवाय नमः, प्रद्युम्नाय नमः, अनिरुद्दाय नमः,पुरुषोत्तमाय नमः, अधोक्षजाय नमः, नारसिंहाय नमः, अच्युताय नमः, जनार्धनाय नमः, उपेंद्राय नमः, हरये नमः, श्री कृष्णाय नमः
श्री कृष्ण परब्रह्मणे नमः

भू शुद्धि
उत्तिष्ठंतु भूतपिशाचा: एते भूमि भारकाः , एतेषामविरोधेना ब्रह्मकर्म समारभे
(अक्षतलनु वासन चूसि ऎडम वैपुन वेसुकोनवलॆनु)
प्राणायामं:
पूरकं कुंभकं चैव रेचकं तदनंतरं प्राणायाम मिदं प्रोक्तं सर्वदेव वशंकरं||
( लेक)
अंगुळ्याग्रे नासिकाग्रे संपीड्यं पापनाशनं प्राणायाममिदं प्रोक्तं ऋषिभिः परिकल्पितं||
( पै श्लोकं चदिवि, कुडि चॆय्यि बॊटन व्रेलु मरियु उंगरं, चिटिकिन वेळ्ळ सहायंतो प्राणायामं चेयवलॆनु)
संकल्पं:
( कुडि चेतिलोनिकि अक्षतलनु तीसुकुनि, कुडि तॊडपै आ चेतिनि ऎडम चेतितो मूसिउंचि संकल्पं चॆप्पुकोवलॆनु)
मम उपात्त समस्तदुरित क्षयद्वारा श्री परमेश्वर मुद्दिश्य श्री परमेश्वर प्रीत्यर्धं, शुभाभ्यं शुभे शोभने मुहूर्ते श्री महाविष्णोराज्ञाया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीयपरार्धे, श्वेतवराहकल्पे वैवस्वत मन्वंतरे, अष्टाविंशतितमे कलियुगे प्रथमपादे जंबूद्वीपे भरतवर्षे भरतखंडे मेरोः दक्षिण दिग्भागे, श्रीशैलस्य _प्रदेशे _ नद्योः मध्यप्रदेशे (क्रौंच द्वीपे रमणक वर्षे, ऐंद्र खंडे, रम्यक पश्चिम देशे, सप्त समुद्रंतरे/जंबू द्वीपे,भरत वर्षे, भरत खंडस्य, पश्चिम दिग्भागे, उत्तर अमॆरिका खंडे) लक्ष्मी निवासगृहे, समस्त देवता, ब्राह्मण, आचार्य, हरिहर, गुरु चरण सन्निधौ, अस्मिन् वर्तमान व्यावहारिक चांद्रमानेन स्वस्ति श्री _नाम संवत्सरे, _अयने _ऋतौ _मासे _ पक्षे _ तिधौ _ वासरे _ नक्षत्रे _योगे _ करणे एवंगुण विशेषण विशिष्टायां शुभतिथौ श्री परमेश्वर मुद्दिश्य श्री परमेश्वर प्रीत्यर्थं
श्रीमती_ गोत्रवती_नामधेयवती/ श्रीमत्याः _गोत्रवत्याः_नामधेयवत्याः, मम धीर्घ सौमंगळ्य सिद्यर्थं, मम भर्ता सहा, कुटुंबस्य आयुष्याभि वृद्ध्यर्थं, सकल सौभाग्य सिद्यर्थं, क्षेम स्थैर्य धैर्य वीर्य विजय अभय आयुः आरोग्य ऐश्वर्य अभिवृद्ध्यर्धं, धर्म अर्थ काम मोक्ष चतुर्विध पुरुषार्थ फल सिद्ध्यर्थं, इष्ट काम्यार्थ सिद्यर्धं, पुत्र पौत्राभिवृद्ध्यर्धं, श्री महाकाळी महा लक्ष्मी महा सरस्वती स्वरूप सर्वात्मिक भगवती श्री गारी परमेश्वरी दिव्य देवता मुद्दिश्य, श्री महाकाळी महा लक्ष्मी महा सरस्वती श्री गारी परमेश्वरी दिव्य देवताप्रीत्यर्थं, सांग सपरिवार समेत श्री गारी परमेश्वरि दिव्य देवता षोडश उपचार पूजांच करिष्ये..( नीळ्ळु अक्षतलु वदलवलॆनु) तदंग कलशाराधनं करिष्ये .....
कलशाराधनं:
( कलसमुलो नीरु निंपि, गंधमुतो कलशकु कुंकुम बॊट्टु पॆट्टि, पुष्पाक्षातलु वेसि, कलशनु स्पृशिंचि ई क्रिंदि मंत्रमुलु चॆप्पवलॆनु)
कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः
मूले तत्र स्थितो ब्रह्मा मध्ये मातृ गणाः स्मृता:
कुक्षौतु सागराः सर्वे सप्तद्वीपा वसुंधरा
ऋग्वेदोथ यजर्वेद स्सामवेदो ह्यधर्वणः
अंगैश्च सहिताः सर्वे कलशांबु समाश्रिताः

अत्र तिष्टंतु सावित्रि गायत्रि च सरस्वति
स्कंदो गणपतिश्चैव शांतिः पुष्टकरीतथा ||
गंगे च यमुने चैव गोदावरि सरस्वती, नर्मदे सिंधु कावेरी जलेस्मिन् सन्निधिं कुरु, कावेरी तुंगभद्रा च कृष्णवेणी च गौतमी, भागीरथीति विख्याताः पंच गंगाः प्रकीर्तिताः||
आयांतु श्री गौरी परमेश्वरी पूजार्थं मम दुरितक्षयकारकाः कलशोदकेन पूजा द्रव्याणि संप्रोक्ष्य, देवीं संप्रोक्ष्य, आत्मानं च संप्रोक्ष्य .........
( कलशलोनि नीटिनि पूजा द्राव्यालपै, अम्मवारि पै तदनंतरं तम शिरस्सुन चल्लुकोवलॆनु)
||सर्व मंगळ मांगळ्ये शिवे सर्वार्थ साधिके शरण्ये त्र्यंबिके गौरी नारायणि नमस्तुते||
ध्यान0
श्लो ||कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्मणि-
-द्वीपे कल्पकवाटिकापरिवृते कादम्बवाट्युज्ज्वले |
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिंतारत्नविनिर्मितं जननि ते सिंहासनं भावये||
दुर्गे कात्यायनिदेवि शांभवि शंकरप्रिये
मयाभक्त्या कृतांपूजां गृहाणत्वं सुरेश्वरि ||
श्री गौर्यै नमः ध्यानं समर्पयामि.
आवाहनं
श्लो||एणांकानलभानुमंडललसच्छ्रीचक्रमध्येस्थितां
बालार्कद्युतिभासुरां करतलैः पाशांकुशौ बिभ्रतीम्
चापं बाणमपि प्रसन्नवदनां कौसुंभवस्त्रान्वितां
तां त्वां चंद्रकळावतंसमकुटां चारुस्मितां भावये||
सपती सांग सपरिवार समेत
श्री गौर्यै नमः आवाहयामि, स्थापयामि पूजयामि.
देवि सर्व जगन्मातः यावत्पूजाव
सानगं, तावत्त्वं प्रीति भावेन बिंबेस्मिन्/ कलशेस्मिन् सन्निधिम् कुरु ( अम्मवारि पादमुल दग्गर पुव्वुलु/ अक्षतलु समर्पिंचि, नमस्कारं चेस्तू…)
श्री गौरी देवता आवाहिताभव! स्थापिताभव! सुप्रसन्ना भव! वरदा भव! अवकुंठिता भव! स्थिरासनं कुरु! प्रसीद! प्रसीद! (नमस्करिंचवलॆनु)
आसनं:
श्लो|| ईशानादिपदं शिवैकफलकं रत्नासनं ते शुभं
पाद्यं कुंकुमचंदनादिभरितैरर्घ्यं सरत्नाक्षतैः
शुद्धैराचमनीयकं तव जलैर्भक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं
संतुष्टये कल्पताम्||

श्री गौर्यै नमः नवरत्न खचित हेम सिंहासनं समर्पयामि.
सिंहासनार्थं पुष्पाणि समर्पयामि.
( अमावारि पादमुल चेंत पुष्पमुनु समर्पिंचवलेनु)
पाद्यं:
श्लो॥लक्ष्मी ज्ञान सुधार्णवजले ना पूर्य पात्राघ्र्यकं
लक्ता लंकृत पाद पंकजयुगं संक्षाळ्य भक्त्या पुनः
लक्ष्मी रंजित हेम धाम कलशे नापूर्य शीतांबुना
आचम्यार्थमिदं प्रकल्पितमहं गृहणातु ते शांभवि||
श्री गौर्यै नमः पादयोः पाद्यं समर्पयामि.
( कलशलोनि नीटिनि पुष्पमुतो अम्मवारि पादमुल पै चल्लवलेनु)
अघ्र्यं:
श्लो॥ह्रींकारोद्य सुवर्ण कल्पित कळालंकार सिंहासने
ह्रींकारांत सरस्वतीच यमुना गंगा जलैरावृतं
ह्रींकारादि समस्त शुद्ध कलशैः संस्तूय मानं मुदा
ह्रींकारांकित हेम वर्ण महिमा ह्रींकार नाद प्रिये ||
श्री गौर्यै नमः हस्तयोः अघ्र्यं समर्पयामि.
(कलशलोनि नीटिनि पुष्पमुतो अम्मवारि चेतुलपै चल्लवलेनु)
आचमनीयं:
श्लो॥शुद्धैराचमनीयकं तव जलैर्बक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं संतु ष्टये कल्पताम्
गंगा नर्मद पुण्यतोय विमलैरानीय भक्त्या पुनः
आचम्यार्थ मिदं प्रकल्पितमहं गृहणातु ते शांभवि||
श्री गौर्यै नमः इत्याचमनीयम् समर्पयामि.
(कलशलोनि नीटिनि पुष्पमुतो अम्मवारिकि समर्पिंचवलेनु)
मधुपर्कं :
श्लो॥गोक्षीरैर्मधु शर्करैश्च मिशितं चाज्यं नवं निर्मलं
भक्त्या नीत मिदं मयाच सुभगे सन्नारि कॆळांबु भिः
स्नानार्थंतु ददामिते शुभकरे भानुप्रभा भास्वरं
वस्त्रं दास्यतुते त्रिलोक जननि गृहणीष्व माहेश्वरि||
श्री गौर्यै नमः मधुपर्कं समर्पयामि
( पॆरुगु मरियु तेनॆ कलिपिन मिश्रमान्नि अम्मवारिकि समर्पिंचवलेनु) मधुपर्कं अनंतरं शुद्ध आचमनीयं समर्पयामि.
(कलशलोनि नीटिनि पुष्पमुतो अम्मवारिकि समर्पिंचवलेनु)
स्नानं:

( इक्कड अम्मवारिकि पंचामृतालतो अभिषेकं चेस्तुन्न यॆडल, शुद्धमैन पत्तितो चिन्न वस्त्रं चेसि, पसुपु, कुंकुम बॊट्टु पॆट्टि, आ वस्त्रं अम्मवारि वक्ष स्थलंपै उंचि अभिषेकं चेयवलॆनु)
श्लो॥ लक्ष्ये योगिजनस्य रक्षित जगज्जाले विशालेक्षणे
प्रालेयांबुपटीर कुंकुमलसत्कर्पूर मिश्रोदकैः
गोक्षीरैपि नारिकेळसलिलैः शुद्धोदकैर्मंत्रितैः
स्नानं देवि धिया मयैतदखिलं संतुष्टये कल्पताम्॥
श्री गौर्यै नमः स्नानं समर्पयामि.
( फलॊदकं/ कलशलोनि शुद्दॊदकं अम्मवारिपै पुष्पमुतो चल्लवलॆनु)
स्नानानंतरं आचमनीयं समर्पयामि.
( अम्मवारिकि कलशलोनि नीटिनि समर्पिंचवलॆनु)
वस्त्रं:
श्लो॥ह्रींकारांकितमंत्रलक्षिततनो हेमाचलात्संचितै
रत्नैरुज्ज्वलमुत्तरीयसहितं कौसुंभ वर्णाम् शुकं
मुक्तासंततियज्ञसूत्रममलं सावर्णतंतूद्भवं
दत्तं देवि धिया मयैतदखिलं संतुष्टये कल्पताम्॥
श्री गौर्यै नमः वस्त्र युग्मं समर्पयामि, वस्त्रार्थं पुष्पाणि समर्पयामि ( अम्मवारिकि चीर लेक पादमुल चॆंत पुष्पमुनु समर्पिंचवलॆनु) वस्त्रधारणानंतरं, शुद्ध आचमनीयं समर्पयामि.
( अम्मवारिकि कलशलोनि नीटिनि समर्पिंचवलॆनु)
उपवीतं:
श्लो॥हंसारूढ तनु प्रकाश सुभगे क्षौमांबरं भक्तितः
हंसस्फाटिक चंद्रिकाभ विमलं दत्वा शतोत्पर्यकं
हारालंकृत देवि रक्षण भरामानंद मंदस्मितां
वेद्यातीत मधातु संत विभवा माराधया म्यंबिकां॥
श्री गौर्यै नमः सुवर्ण उपवीतं समर्पयामि.
उपवीतार्थं पुष्पाणि/अक्षतानि समर्पयामि.
( अम्मवारि पादमुल चॆंत पुष्पमुनु समर्पिंचवलॆनु)
उपवीतानंतरं आचमनीयं समर्पयामि.
( अम्मवारिकि कलशलोनि नीटिनि समर्पिंचवलॆनु)
आभरणं:
श्लो॥हंसैरप्यतिलोभनीयगमने हारावळीमुज्ज्वलां
हिंदोलद्युतिहीरपूरिततरे हेमांगदे कंकणे।
मंजीरौ मणिकुंडले मकुटमप्यर्धेंदुचूडामणिं
नासामौक्तिक मंगुळीयकटकौ कांचीमपि स्वीकुरु॥
श्री गौर्यै नमः आभरणं समर्पयामि.

( अम्मवारि पादमुल चेंत पुष्पमुनु समर्पिंचवलॆनु)
गंधं:
श्लो||सर्वांगे मनसार कुंकुमघन श्री गंधपंकांकितं
कस्तूरीतिलकं च फालफलके गोरोचनापत्रकम्
गंडादर्शनमंडले नयनयोर्दिव्यांजनं तेंचितं
कंठाब्जे मृगनाभि पंकममलं त्वत्प्रीतये कल्पता० ||
श्री गौर्यै नमः दिव्य श्री चंदनं समर्पयामि.
( पुव्वुनु गंधमुलो मुंचि अम्मवारिकि समर्पिंचवलॆनु)
पुष्पं :
श्लो||कल्हारोत्पलमल्लिकामरुवकैः सावर्ण पंकरुहै-र्जातीचंपकमालतीवकुलकैर्मंदारकुंदादिभिः
केतक्या करवीरकैर्बहुविधैः क्लुप्ताः स्रजो मालिकाः
संकल्पेन समर्पयामि वरदे संतुष्टये गृह्यताम् ॥
श्री गौर्यै नमः पुष्प मालां समर्पयामि.
श्लो॥हारिद्रंच मयानीतं देवी कळ्याण दायिनि
सौभाग्य वर्धनं दिव्यं ददामि हरवल्लभे ||
इति हरिद्रं समर्पयामि.
( पुव्वुनु पसुपु लो मुंचि अम्मवारिकि समर्पिंचवलॆनु)
श्लो॥ कुंकुमं शोभनं दिव्यं सर्वदा मंगळ प्रदं
मयानीतं महादेवि तुभ्यंदास्यामि सुंदरि||
इति कुंकुम विलेपनं समर्पयामि.
( पुव्वुनु कुंकुमलो मुंचि अम्मवारिकि समर्पिंचवलॆनु)
अंग पूज:
( ऒक्कॊक्क नाममुनकु अक्षतलु/ पुष्पमुलु अम्मवारि पादमुलकु समर्पिंचवलॆनु)
ललितायै नमः - पादौ पूजयामि
गिरिजायै नमः - गुल्फौ पूजयामि
सुंदर्यै नमः - जंघे पूजयामि
अपर्णायै नमः - जानुनी पूजयामि
हर प्रियायै नमः – ऊरूपूजयामि
पार्वत्यै नमः - कटिं पूजयामि
आर्यायै नमः - नाभिं पूजयामि
जगन्मात्रे नमः - उदरं पूजयामि
मंगळायै नमः - कुक्षिं पूजयामि
शिवायै नमः - हृदयं पूजयामि
महेश्वर्यै नमः - कंठं पूजयामि

विश्ववंद्यायै नमः – स्कंधौपूजयामि

काळ्यै नमः - बाहून् पूजयामि

आद्यायै नमः - हस्तान् पूजयामि

वरदायै नमः - मुखं पूजयामि

सुवाण्यै नमः - नासिकां पूजयामि

कमलाक्ष्यै नमः - नेत्रे पूजयामि

अंबिकायै नमः - शिरः पूजयामि

श्री महाकाळी महालक्ष्मी महा सरस्वत्यै नमः सर्वाण्यंगानि पूजयामि.

( अष्टोत्तरं, सहस्रं…..)

( अधांग पूजानंतरं यथा संभवमुगा अष्टोत्तरं कानी, सहस्र नामालतो कानी मरि ए इतर देवी/ देवता स्तोत्रमुलु कूडा चदुवुकुंटू कुंकुम पूज चेसुकॊनवच्चुनु)

श्री गौरी परमेश्वर्यै नमः कुंकुम, हरिद्राक्षत, पुष्पैहि पूजयामि.

धूपं :

श्लो॥ हंतारं मदनस्य नंदयसि यैरंगैरनंगोज्ज्वलै-
र्यैर्भृंगावलिनीलकुंतलभरैर्बध्नासि तस्याशयम् |
तानीमानि तवांब कोमलतराण्यामोदलीलागृहा -ण्यामोदाय दशांगगुग्गुलुघृतैर्धूपैरहं धूपये||

श्री गौर्यै नमः धूपमाघ्रापयामि.

( अम्मवारिकि दूपं समर्पिंचवलॆनु)

दीपं:

श्लो॥लक्ष्मीमुज्ज्वलयामि रत्ननिवहोद्भास्वत्तरे मंदिरे
मालारूपविलंबितैर्मणिमय स्तंबेषु संभावितैः
चित्रैर्हाटकपुत्रिकाकरधृतैर्गव्यैर्घृतैर्वर्धितै-
-र्दिव्यैर्दीपगणैर्धिया गिरिसुते संतुष्टये कल्पताम्||

श्री गौर्यै नमः दीपं दर्षयामि

( दीप कांतिलो अम्मवारिनि आपाद मस्तकं दर्शिंचवलॆनु)

धूप, दीपानंतरं आचमनीयं समर्पयामि.

( अम्मवारिकि कलशलोनि नीटिनि समर्पिंचवलॆनु)

नैवेद्यं:

श्लो॥ह्रींकारेश्वरि तप्तहाटककृतैः स्थालीसहस्रैर्भृतं
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदं तथा ।
दुग्धान्नं मधुशर्करादधियुतं माणिक्यपात्रे स्थितं
माषापूपसहस्रमंब सकलं नैवेद्यमावेदये||

अपवित्रः पवित्रो वा सर्वावस्थां गतोपिवा | यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतर श्शुचिः ||

( कलशलोनि नीटितो नैवेद्य पदार्थंपै प्रोक्षण चेयवलॆनु)

पुंडरीकाक्ष ! पुंडरीकाक्ष ! पुंडरीकाक्षाय नमः ||
श्री गौर्यै नमः नैवेद्यं समर्पयामि.
( कुडि चेतितो नैवेद्यान्नि ऐदु सार्लु अम्मवारिकि चूपिंचवलॆनु)
प्राणाय नमः, अपानाय नमः, व्यानाय नमः, उदानाय नमः, समानाय नमः
( तदनंतरं ऐदु सार्लु कलशलोनि नीटिनि अम्मवारिकि समर्पिंचवलॆनु)
मध्ये मध्ये पानीयं समर्पयामि, उत्तरापोशनं समर्पयामि, हस्तौ प्रक्षाळयामि, पादौ प्रक्षाळयामि
शुद्धाचमनीयं समर्पयामि.
तांबूलं:
श्लो॥सच्छायैर्वरकेतकीदलरुचा तांबूलवल्लीदलैः
पूगैर्भूरिगुणैः सुगंधिमधुरैः कर्पूरखंडोज्ज्वलैः ।
मुक्ताचूर्णविराजितैर्बहुविधैर्वक्त्रांबुजामोदनैः
पूर्णा रत्नकलाचिका तव मुदे न्यस्ता पुरस्तादुमे ॥
श्री गौर्यै नमः दक्षिण सहित तांबूलं समर्पयामि.
(अम्मवारिकि तमलपाकुलु, वक्क, यथा शक्ति दक्षिण तदितरमैन पदार्थमुलतो कूडिन तांबूलं / अक्षतलु लेक पुष्पं समर्पिंचवलॆनु)
तांबूल चर्वणानंतरं आचमनीयं समर्पयामि.
( अम्मवारिकि कलशलोनि नीटिनि समर्पिंचवलॆनु)
नीराजनं:
श्लो॥कन्याभिःकमनीयकांतिभिरलंकारामलारार्तिका
पात्रेमौक्तिकचित्रपंक्तिविलसत्कर्पूरदीपालिभिः ।
तत्तत्तालमृदंगगीतसहितं नृत्यत्पदांभोरुहं
मंत्राराधनपूर्वकं सुविहितं नीराजनं गृह्यताम् ॥
श्री गौर्यै नमः आनंद कर्पूर नीराजनं समर्पयामि.
( अमावारिकि कर्पूर हारति समर्पण चेयवलॆनु)
नीराजनंतरं आचमनीयं समर्पयामि.
( अम्मवारिकि कलशलोनि नीटिनि समर्पिंचवलॆनु)
नमस्करोमि. ( हारति मन कळ्ळकु अद्दुकोवलॆनु)
मंत्र पुष्पं:
ईशानी लक्ष्मीश्च०द्राभा श्री सूर्याभेश्वरी वरा
चंद्र सूर्य प्रभालक्ष्मी: पूज्या मंगळ सुखप्रदा||
सर्वमंगळ मांगळ्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबिके देवि नारायणि नमोस्तुते||
वेदमाता वेदसारा श्रृति मस्तक गॊचरा
सर्व मंगळ मांगळ्ये त्वांभजे परमेश्वरीं||
( लक्ष्मीं क्षीर समुद्र….)

श्री गौरी परमेश्वर्यै नमः सुवर्ण मंत्र पुष्प० समर्पयामि.
( पुव्वुलु, अक्षतलु अम्मवारि पादमुलकु समर्पिंचवलॆनु)
पुनः पूजा:
श्लो ||लक्ष्मीमौक्तिकलक्षकल्पितसितच्छत्रं तु धत्ते रसा-
-दिंद्राणी च रतिश्च चामरवरे धत्ते स्वयं भारती
वीणामेणविलोचनाः सुमनसां नृत्यंति तद्रागव-
-द्भावैरांगिकसात्त्विकैः स्फुटरसं मातस्तदाकर्ण्यताम्||
श्री गौरी परमेश्वर्यै नमः छत्रं समर्पयामि, चामरैर्वीजयामि, गीतं श्रावयामि, वाद्यं घोषयामि, समस्त राजोपचार, भक्त्योपचार, शक्त्योपचार पूर्वक पूजां समर्पयामि.
( पुव्वुलु, अक्षतलु अम्मवारि पादमुलकु समर्पिंचवलॆनु)
प्रदक्षिणं:
श्लो||ह्रींकारत्रयसंपुटेन मनुनोपास्ये त्रयीमौलिभि-
-र्वाक्यैर्लक्ष्यतनो तव स्तुतिविधौ को वा क्षमेतांबिके ।
सल्लापाः स्तुतयः प्रदक्षिणशतं संचार एवास्तु ते
संवेशो नमसः सहस्रमखिलं त्वत्प्रीतये कल्पताम्||
यानिकानि च पापानि जन्मांतर कृतानि च, तानि तानि प्रणश्य०ति प्रदक्षिण पदे पदे|
पापोहं पापकर्माहं पापात्मा पापसंभव:, त्राहिमां कृपया देवि शरणागत वत्सले
अन्यथा शरणं नास्ति त्वमेव शरणं मम, तस्मात्कारुण्य भावेन रक्ष रक्ष सुरेश्वरि||
श्री गौरी देवतायै नमः आत्म प्रदक्षिण त्रय नमस्कारान् समर्पयामि.
प्रार्थन पूर्वक क्षमायाचनं:
( नमस्कारं चेस्तू…)
पुत्रान् देहि धनं देहि सौभाग्य सर्व मंगळं
सौमंगळ्यं सुखं ज्ञानं देहिमे शिव सुंदरि||
यस्य स्मृत्याच नामोक्त्या तपः पूजा क्रियाधिषु
न्यूनं संपूर्णताम् याति सद्यो वंदे तमच्युतं||
मंत्रहीनं क्रियाहीनं भक्तिहीनं परमेश्वरि, यत्पूजितं मयादेवि परिपूर्णं तदस्तुते||
आवाहनं न जानामि न जानामि विसर्जनं पूजा विधिं न जानामि क्षम्यतां परमेश्वरि||
अपराधसहस्राणि क्रियंतेहर्निशं मया | दासोयमिति मां मत्वा क्षमस्व परमेश्वरि||
यदक्षर पदभ्रष्टं, मात्र हीनं च यद्भवेत् |
तत्सर्वं क्षम्यतां देवी नारायणि नमोस्तुते ||
श्लो || श्री मंत्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा
संध्यासु प्रतिवासरं सुनियतस्त स्यामलं स्यान्मनः |
चित्रांभोरुहमंटपे गिरिसुता नृत्तं विधत्ते रसा-
-द्वाणी वक्त्र सरोरुहे जलधिजा गेहे जगन्म०गळा||

श्लो ||इति गिरिवरपुत्रीपादराजीवभूषा
भुवनममलयंती सूक्तिसौरभ्य सारैः|
शिवपदमकरंद स्य०दिनीयं निबद्धा
मदयतु कवि भृ०गान्मातृका पुष्पमाला||
( अक्षतलु, नीळ्लु कुडि अरचेतिलोंचि पळ्लॆमुलो वदलवलॆनु)
अनया ध्यान आवाहनादि यथा शक्ति षोडशोपचार पूजयाच भगवती सर्वात्मिका श्री गारी देवता सुप्रीता सुप्रसन्नावरदा भवतु|
एतत् फलं सर्वं श्री परमेश्वरार्पण मस्तु||
(अम्मवारिकि पूज चेसिन पुव्वुनु/ अक्षतलनु शिरस्सुन धरिंचवलॆनु)
श्री गौरी परमेश्वरी देवता प्रसादं शिरसा गृहणामि||
सर्वे भवंतु सुखिनः
सर्वे संतु निरामयाः
सर्वे भद्राणि पश्यंतु
मा कश्चित् दुःख भाग् भवेत्||
हर हर शंकर जय जय शंकर||
||स्वस्ति||
वारमुलु:
भानुवासरे, इंदुवासरे, भौम वासरे, सौम्य वासरे, बृहस्पति वासरे, भृगु वासरे, स्थिर वासरे.
पक्षमुलु:
शुक्ल पक्षे, कृष्ण पक्षे
तिथुलु :
प्रतिपत्तिथौ, द्वितीयायाम्, तृतीयायां, चतुर्थ्याम्, पंचाम्याम्, षष्ट्यां, सप्तम्याम्, अष्टम्याम्, नवम्याम्, दशम्याम्, एकादस्याम्,द्वादस्याम्, त्रयोदस्याम्, चतुर्थस्याम्, पौर्णमास्यायाम्, अमा वास्यायाम्.
मासमुलु:
वसंत ऋतौः- चैत्र मासे, वैशाख मासे
ग्रीष्म ऋतौः- ज्येष्ठ मासे, आषाड मासे
वर्ष ऋतौः- श्रावण मासे, भाद्रपद मासे
शरद् ऋतौः- आश्वीयुज मासे, कार्तीक मासे
हेमंत ऋतौः- मार्गशिर मासे, पुष्य मासे
शिशिर ऋतौः- माघ मासे, फाल्गुण मासे
द्वीपमुलु:
भारतदेशं- जंबू द्वीपे, भारत खंडे, भरत वर्षे
उत्तर अमॆरिका- क्रौंच द्वीपे, ऐंद्र खंडे, रमणक वर्षे

दक्षिण अमॆरिका- प्लक्ष द्वीपे
यूरोप्- शाका द्वीपे
आस्ट्रेलिया- शाल्मली द्वीपे
इंडोनेसिना- कुश द्वीपे
आफ्रिका - पुष्कर द्वीपे
श्री काशी संकल्पमु
मम उपात्त समस्तदुरित क्षयद्वारा श्री परमेश्वर मुद्दिश्य श्री परमेश्वर प्रीत्यर्धं, शुभाभ्यं शुभे शोभने मुहूर्ते श्री महाविष्णोराज्ञाया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीयपरार्धे, श्वेतवराहकल्पे वैवस्वत मन्वंतरे, अष्टाविंशतितमे कलियुगे प्रथमपादे जंबूद्वीपे भरतवर्षे भरतखंडे मेरोः दक्षिण दिग्भागे, विंध्यस्योत्तर, आर्या वर्तैकदेशे, असी वरण योर्मध्ये, अविमुक्त वारणासी क्षेत्रे, आनंदवने, महा स्मशाने, गौरीमुखे, त्रिक०टक विराजिते, उत्तर वाहिन्या:, भागी रथ्या:, पश्चिमे तीरे, ब्रह्मनाळे, महा मणिकर्णिका क्षेत्रे, श्री विश्वेश्वरादि, त्रयस्त्रि०शत्कोटि, देवता गो ब्राह्मण, हरिहर गुरु चरण सन्निथौ, अस्मिन् वर्तमान व्यावहारिक, बार्हस्पत्य मानेन .....नामसंवत्सरे,चांद्रसौरमानाभ्यां,.....नाम संवत्सरे, _अयने _ऋतौ _मासे _ पक्षे, शुभ तिधौ, _ वासरे, शुभ वासरे, शुभ नक्षत्रे, शुभ योग, शुभ करणे एवंगुण विशेषण विशिष्टायां शुभतिथौ, श्रीमान्/ श्रीमती···गोत्रः/ गोत्रा······नाम धेयः/ नामधेया श्रीमतः/ श्रीमात्या:...गोत्रस्य/ गोत्राया: नामधेयस्य/ नामधेयायाः धर्म पत्नी समेतस्य/ सभर्तृकाया: सह कुटुंबस्य/ सह कुटुंबाया: मम क्षेम स्थैर्य धैर्य वीर्य विजय अभय आयुः आरोग्य ऐश्वर्य अभिवृद्ध्यर्धं, धर्म अर्थ काम मोक्ष चतुर्विध पुरुषार्थ फल सिद्ध्यर्थं, इहजन्मनि, जन्मजन्मांतरेषुच, मनोवाक्कायकर्मभि:, ज्ञानतः अज्ञानतः मयाकृत सर्व पाप क्षयार्थं श्री विशालाक्षी अन्नपूर्णा समेत श्री काशी विश्वेश्वर देवता प्रीत्यर्थं महामणिकर्णिका/ भागीरथी स्नानं अहं करिष्ये.